CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.A.

Coll. No. 410

Title Abda pujana vidhi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 410. Subject: Pauranic Rit.

Title: Abda pūjana vidhi

Author: — Scribe: Śivadeva

Date of the work: — Date of the Ms.: V.S. ३८६६ / ७३

Place of the work: — Place of the Ms.: —

Size: 6.5" by 4.1" Extent: 4 foll

Language: Sanskrit Script: Devanāgari

Remarks: —

॥श्रीगणेशायनमः॥ अथाब्दपूजनं॥ व्यवहारनिर्णये॥
आदौगणपतिपूजनं॥ अद्येत्यादिप्रयोगः॥ ममआयु
ष्यकामनासिध्यर्थंमार्कंडेयादिदेवतास्थापनं॥ प्रतिष्ठा
पूजनमहंकरिष्ये॥ तंदुलपुंजंकृत्वा॥ तदुपरिदेवतास्था
पनं॥ मार्कंडेयंआवाहयामिस्थापयामि॥ व्यासं०१॥ रा
मं०२॥ द्रोणं०३॥ कृपं०४॥ बलिं०५॥ प्रह्लादं०६॥ हनुमंतं०७ १
विभीषणं०८॥ प्रतिष्ठा॥ तदस्तुमित्रा०य॥ नवांबरधरोभू

त्वापूजयेच्चचिरायुषं॥ मार्कंडेयंनरोभक्त्यापूजयेत्प्रयत
स्तथा॥१॥ ततोदीर्घायुषंव्यासंरामंद्रौणिंकृपंबलिंप्रह्ला
दंचहनूमंतंविभीषणमथार्चयेत्॥२॥ स्वनक्षत्रंजन्मति
थिंप्राप्यसंपूजयेन्नरः॥ षष्ठीचदधिभक्तेनवर्षेवर्षेपुनः
पुनः॥३॥ आदित्यपुराणे॥ सर्वैश्चजन्मदिवसेस्नातैर्मं
गलवारिभिः॥ गुरुदेवाग्निविप्राश्चपूजनीयाप्रयत्नतः॥
४॥ मार्कंडेयादिदेवा॥ आवाहनादिपूजा॥ मार्कंडे

यादिदेवा आवाहनंसमर्पयामि। आसनं। पाद्यं। अ
र्घं। आचमनं। स्नानं। वस्त्रं। यज्ञोपवीतं। चंदनं। पुष्पं।
धूपं। दीपं। नैवेद्यं। फलतांबूलं। हिरण्यदक्षिणां। प्रदक्षि
णा। नमस्कारं। प्रतिसंवत्सरंयत्नात्कर्त्तव्यश्चमहोत्स
वः॥ लसाचिंतामणौ॥ गुडदुग्धतिलान्ब्राह्मणान्दद्या
त्। गुडदुग्धतिलान्दद्यात्वस्त्रेयंपोचवंधयेत्। गुग्गु
लंबसिद्धार्थंदूर्वागोरोचनादिकं॥१॥ गुग्गुलं। निंब। २

दूर्वा। गोरोचना। वस्त्रेबंधनं। तद्दूपरिनानुविघ्नेशंप्रति
ष्ठाप्य। तदस्कंमित्रा। य। इदमंत्रादिपंचोपचारैःपू
जनं। संपूज्यंनानुविघ्नेशंमहर्षिप्रार्थयेदिदं। चिरंजि
वियथात्वंहिनविप्र्यामितथामुने॥१॥ रूपवान्वित्तवांश्चै
वश्रियायुक्तश्चसर्वदा। मार्कंडेयनमस्तेस्तुसप्तकल्पांत
जीवन॥२॥ आयुरारोग्यसिद्ध्यर्थंप्रसीदभगवन्मुने। चि
रजीवीयथात्वंतुमुनीनांप्रवरद्विजः॥३॥ कुरुष्वमुनि

शार्दूलतथामांचिरंजीवनं।मार्कंडेयमहाभागसप्तकल्पां
न्तजीवनं॥४७॥आयुरारोग्यसिध्यर्थंअस्माकंवरदोभव।
सतिलं।गुड।पयः।पृथक्।मार्कंडेयादिदेवताभ्यस्त्र्यां
जलींदद्यात्॥श्लोक।सतिलंगुडसंमिश्रंमंजल्यर्द्धंमितं
पयः।मार्कंडेयवरंलब्ध्वापिबाम्यायुष्यवृद्धये॥१॥तिथि
त्वो।मुंडनंनखकेशांश्चमैथुनाध्वगमौतथा।आमिषंक
लहंहिंसांवर्षेहिस्तोविवर्जयेत्॥२॥इतिअर्घ्यप्रार्थनं॥ ॥ ४३

अथप्रार्थना॥नववर्षायुर्षप्राप्यतपसामहता पुरा।सप्तक
ल्पांतिकंत्वायुःप्राप्तंहिमुनिनाचयत्॥१॥आयुर्देहिय
शोदेहि श्रियंदेहिधनंतथा।पुत्रपौत्रप्रपौत्रांश्चमार्कंडे
यमहामुने॥२॥द्रोणपुत्रमहाभागचंद्रतेजसमुद्भव।
नवायबलदोमेत्वंअश्वत्थाम्नेनमोनमः॥३॥दैत्येंद्रकु
लसंभूतबलेर्दानादरेपुरा।शरणंत्वांप्रपन्नोस्मिदीर्घ
मायुःप्रयच्छमे॥४॥नविष्यवर्त्ममाबंचअतीतस्रानवा

मुने। नारायणसमुत्पन्नं व्यासमायुः प्रदोस्तु वः॥ ५॥
श्रंजनीगर्भसंभूतकपीन्द्रसचिवोत्तमः। रामप्रियनमस्कृत्यं हनुमान्‌रक्षसर्वदा॥ ६॥ विभीषणं नमस्कृत्यं
सत्ययेरामभक्तक। आयुरारोग्यमैश्वर्यं देहिमेजनस्यनंदन॥ ७॥ द्विजेंद्रनरतान्कार्यसर्वसिद्धिविशारदा॥ शार
णंत्वांप्रपन्नोस्मिन्‌दपायुश्च ठपांकुरु॥ ८॥ रेणुकेयमहावीर क्षत्रियान्‌नयनाशन। आयुःप्रयछमेराजन्‌
जमदग्निनमोस्कृते॥ ॥ इतिप्रार्थना॥ इतिव्यवहारनिर्णयेश्राद्धपूजाविधिःसमाप्तः॥ संवत्‌१८६६वर्षेपौष
शुक्ल १ शनौ द्विवेदीपनाम्नकशिवदेवेनालिखितं॥